# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**- आचार्यद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् - २** (New) | **गुणाः** - ७० |
| **विषयः** - नव्यव्याकरणम् | **कोड- CC - 5.3.7** | **समयः** - १० तः १ |
| **दिनाङ्कः** - ०५/१२/२०१८ | **सन्दर्भग्रन्थः**- महाभाष्यं वैयाकरणसिद्धान्तकौमुदी च | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ कस्यापि एकस्य सङ्क्षिप्तमुत्तरं लेख्यम् ।** ०५

स्थानिवत्-सूत्रे वत्-करणप्रयोजनं लिखत ।

अथवा

स्थानिवत्-सूत्रे विधिग्रहणप्रयोजनं लिखत ।

**प्र-२ कस्यापि एकस्य विस्तृतमुत्तरं लेख्यम् ।** १०

१. **स्थानिवदादेशोऽनल्विधौ** इत्यस्य सूत्रस्य प्रत्याख्यानं भाष्यकारः कथं करोति इति विस्तरशः लेख्यम् ।

२. **अचः परस्मिन् पूर्वविधौ** इत्यस्य सूत्रस्य भाष्यानुसारिणी व्याख्या कार्या ।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ कस्यापि एकस्य सङ्क्षिप्तमुत्तरं लेख्यम् ।** ०५

**न पदान्त.....** इति सूत्रे विधिशब्दस्य भावसाधनतां कर्मसाधनतां च प्रदर्श्य तयोः गुणदोषौ भाष्यदिशा चर्चयत ।

अथवा

**द्विर्वचनेऽचि** इति सूत्रे द्विर्वचन-शब्दस्य एकशेषकल्पनया द्वौ अर्थौ भाष्यानुसारं विवेचयत ।

**प्र-४ कस्यापि एकस्य विस्तृतमुत्तरं लेख्यम् ।** १०

१. **न पदान्त.....** इति सूत्रस्य भाष्यानुसारिणी व्याख्या कार्या ।

२. **द्विर्वचनेऽचि** इति सूत्रस्य भाष्यानुसारिणी व्याख्या कार्या ।

**॥ तृतीयान्वितिः ॥**

**प्र-५ कस्यापि एकस्य सङ्क्षिप्तमुत्तरं लेख्यम् ।** ०५

**प्रत्ययस्य लुक्श्लुलुपः** इति सूत्रं भाष्यदिशा व्याख्येयम् ।

अथवा

**अदर्शनं लोपः** इति सूत्रं भाष्यदिशा व्याख्येयम् ।

**प्र-६ कस्यापि एकस्य विस्तृतमुत्तरं लेख्यम् ।** **१०**

१. **प्रत्ययलोपे प्रत्ययलक्षणम्** इति सूत्रं भाष्यदिशा व्याख्येयम् ।

२. **न लुमताङ्गस्य** इति सूत्रं भाष्यदिशा व्याख्येयम् ।

**॥ चतुर्थान्वितिः ॥**

**प्र-७ कस्यापि एकस्य सूत्रस्य सोदाहरणं व्याख्या कार्या ।** **०५**

अनुदात्तं पदमेकवर्जम् ।

अथवा

सामान्यवचनं विभाषितं विशेषवचने ।

**प्र-८ केऽपि द्वे रूपे सस्वरं सूत्रोल्लेखपुरःसरं साधनीये ।** **१०**

१. <u>गो</u> <u>पा</u> यतं नः

२. ख<u>लु</u>प्व्यांशा

**प्र-९ केषामपि दशानाम् एकैकवाक्यैः उत्तराणि लेख्यानि ।** **१०**

१. स्थानिवत्-सूत्रे आदेशग्रहणस्य किं प्रयोजनम् उक्तम् ?

२. 'अलाश्रयो विधिः अल्विधिः' इत्येवं विग्रहस्वीकारस्य किं प्रयोजनम् ?

३. लोकतः सिद्धस्य स्थानिवद्भावस्य व्याकरणशास्त्रे निवर्तकं सूत्रं किम् ?

४. व्याकरणशास्त्रे स्थान्यादेशत्वं किमर्थमनुपपन्नं भवति ?

५. 'कार्याविपरिणामाद्वा' इत्यत्र कार्या-शब्दस्य कः अर्थः ?

६. 'वेतस्वान्' इत्यत्र रुत्वं कदा प्राप्नोति ?

७. '**यायावरः**' इत्यत्र आकारस्य लोपः कस्मात् न प्राप्नोति ?

८. '**द्विर्वचनेऽचि**' इत्यत्र अच्-ग्रहणं किं ज्ञापयति ?

९. लोपसंज्ञा अदर्शनशब्दस्य भवति अदर्शनार्थस्य वा ?

१०. कीदृशस्य अदर्शनं लोपसंज्ञं भवति ?

११. '**प्रत्ययस्य लुक्श्लुलुपः**' इत्यत्र प्रत्ययग्रहणस्य किं प्रयोजनम् ?

१२. उपधासंज्ञाविधायकं सूत्र किम् ?

१३. ङीप्-प्रत्ययः केन सूत्रेण अनुदात्तः ?

१४. देवीम्' इत्यत्र ईकारः केन सूत्रेण उदात्तः ?

१५. उदात्तात् परस्य अनुदात्तस्य कः स्वरः भवति ?